॥ श्री राघवेंद्र स्तोत्रम ॥

श्री पूर्णबोध गुरुतीर्थ पयोब्धिपारा
कामारिमाक्ष विषमाक्ष शिरस्पृशंती ।
पूर्वोत्तराऽमित तरंग चरत्सुहंसा
देवालि सेवित परांघ्रिपयोजलग्ना ॥ १ ॥

जीवेश भेद गुणपूर्ति जगत्सुसत्व
नीचोच्चभाव मुखनक्र गणैस्समेता ।
दुर्वाद्यजापतिगिलैर्गुरु राघवेंद्र
वाग्देवतासरिदमुं विमलीकरोतु ॥ २ ॥

श्री राघवेंद्रस्सकलप्रदाता स्वपादकंजद्वय भक्तिमद्भ्यः ।
अघाद्रिसंभेदन दृष्टिवज्रः क्षमासुरेंद्रोऽवतु मां सदायं ॥ ३ ॥

श्री राघवेंद्रो हरिपादकंज नीषेवणाल्लब्ध समस्त संपत ।
देवस्वभावो दिविजद्रुमोऽय मिष्टप्रदोमे सततं स भूयात ॥ ४ ॥

भव्यस्वरूपो भवदुःखतूल संघाग्नि चर्यःस्सुखधैर्यशाली ।
समस्त दुष्टग्रहनिग्रहेशो दुरत्ययोपप्लवसिंधुसेतुः ॥ ५ ॥

www.yousigma.com

निरस्तदोषो निरवद्यवेषः प्रत्यर्थिमूकत्व निदानभाषः ।
विद्वत्परिज्ञेय महाविशेषः वाग्वैखरी निर्जित भव्यशेषः ॥ ६ ॥

संतान संपत्परिशुद्ध भक्ति विज्ञानवाग्दे हसुपाटवादीन ।
दत्वाशरीरोऽत्थ समस्तदोषान हत्वा स नोऽव्याद्गुरु राघवेंद्रः ॥ ७ ॥

यत्पादोदकसंचयः सुरनदी मुख्यापगासाधिताऽ
संख्यानुत्तम पुण्यसंघ विलसत्प्रख्यात पुण्यावहः ।
दुस्तापत्रय नाशनोभुवि महावंद्या सुपुत्रप्रदो
व्यंगस्वंग समृद्धिदो ग्रहमहापापापहस्तंश्रये ॥ ८ ॥

यत्पादकंजरजसा परिभूषितांगा
यत्पादपद्म मधुपायित मानसा ये ।
यत्पादपद्म परिकीर्तन जीर्णवाचः
तद्दर्शनं दुरितकानन दावभूतं ॥ ९ ॥

सर्वतंत्र स्वतंत्रोसौ श्रीमध्वमतवर्धनः ।
विजयींद्र कराब्जोत्थ सुधींद्र वरपुत्रकः ॥ १० ॥

श्री राघवेंद्रो यतिराट गुरुर्मे स्याद्भयापः ।
ज्ञानभक्ति सुपुत्रायुर्यशः श्री पुण्यवर्धनः ॥ ११ ॥

www.yousigma.com

प्रतिवादि जयस्वांत भॆदचिह्नादरॊ गुरुः ।
सर्वविद्या प्रवीणान्यॊ राघवॆंद्रान्नविद्यतॆ ॥ १२ ॥

अपरॊक्षीकृत श्रीशः समुपॆक्षितभावजः ।
अपॆक्षित प्रदातान्यॊ राघवॆंद्रान्न विद्यतॆ ॥ १३ ॥

दयादाक्षिण्य वैराग्य वाक्पाटव मुखांकितः ।
शापानुग्रहशक्तॊऽन्यॊ राघवॆंद्रान्न विद्यतॆ ॥ १४ ॥

अज्ञान विस्मृति भ्रांति संशयापस्मृतिक्षयाः ।
तंद्राकंपवचः कौंठ्यमुखायॆ चॆंद्रियॊद्भवाः ।
दॊषाश्तॆ नाशमायांति राघवॆंद्र प्रसादतः ॥ १५ ॥

ऒं श्री राघवॆंद्राय नमः इत्यष्टाक्षर मंत्रतः ।
जपिताद्भावितानित्यं इष्टार्थास्स्युर्नसंशः ॥ १६ ॥

हंतु नः कायजान दॊषान आत्मात्मीय समुद्भवान ।
सर्वानपि पुमर्थांश्च ददातु गुरुरात्मवित ॥ १७ ॥

इति कालत्रयॆनित्यं प्रार्थनांयः करॊतिसः ।

इहामुत्राप्त सर्वॆष्टॊ मॊदतॆ नात्र संशयः ॥ १८ ॥

अगम्य महिमालॊकॆ राघवॆंद्रॊ महायशाः ।
श्री मध्वमत दुग्धाब्धि चंद्रॊवतु सदाऽनघः ॥ १९ ॥

सर्वयात्रा फलावाप्त्यै यथाशक्ति प्रदक्षिणं ।
करॊमि तवसिद्धस्य वृंदावनगतं जलं
शिरसा धारयाम्यद्य सर्वतीर्थ फलाप्तयॆ ॥ २० ॥

सर्वाभीष्टार्थ सिद्ध्यर्थं नमस्कारं करॊम्यहं ।
तवसंकीर्तनं वॆदशास्त्रार्थ ज्ञान सिद्धयॆ ॥ २१ ॥

संसारॆऽक्षयसागरॆ प्रकृतितॊऽगाधॆ सदादुस्तरॆ
सर्वावद्य जलग्रहैरनुपमैः कामादिभंगाकुलॆ ।
नानाविभ्रमदुर्भ्रमॆऽमितभयस्तॊमादिफॆनॊत्कटॆ ।
दुःखॊत्कृष्ट विषॆसमुद्धर गुरॊमामग्नरूपं सदा ॥ २२ ॥

राघवॆंद्र गुरुस्तॊत्रं यः पठॆद्भक्तिपूर्वकं ।
तस्य कुष्टादि रॊगाणां निवृत्तिस्त्वरया भवॆत ॥ २३ ॥

अंधॊपि दिव्य दृष्टिस्स्यादॆडमूकॊपि वाक्पतिः ।

पूर्णायुः पूर्णसंपत्तिः स्तॊत्रस्यास्य जपाद्भवॆत ॥ २४ ॥

यःपिबॆज्जलमॆतॆन स्तॊत्रॆणैवाभिमंत्रितं ।
तस्य कुक्षिगता दॊषाः सर्वॆनश्यंति तत क्षणात ॥ २५ ॥

यदवृंदावन मासाद्य पंगुः खंजॊपि वा जनः ।
स्तॊत्रॆणानॆन यः कुयात प्रदक्षिण नमस्कृती
सं जंघालॊभवॆदॆव गुरुराज प्रसादतः ॥ २६ ॥

सॊमसूर्यॊपरागॆ च पुष्यार्कादि समागमॆ ।
यॊनुत्तम मिदं स्तॊत्रं अष्टॊत्तर शतंजपॆत
भूतप्रॆत पिशाचादि पीडा तस्य न जायतॆ ॥ २७ ॥

ऎतत स्तॊत्रं समुच्चार्य गुरॊर्बृंदावनांतिकॆ ।
दीपसंयॊजनात ज्ञानं पुत्रलाभॊभवॆद्ध्रुवं ॥ २८ ॥

परवादिजयॊदिव्य ज्ञानभक्त्यादिवर्धनं ।
सर्वाभीष्टप्रवृद्धिस्स्यान्नात्रकार्या विचारणा ॥ २९ ॥

राजचॊर महाव्याघ्र सर्पनक्रादिपीडनं ।
न जायतॆऽस्य स्तॊत्रस्य प्रभावान्नात्र संशयः ॥ ३० ॥

www.yousigma.com

यॊ भक्त्या गुरुराघवॆंद्र चरणद्वंद्वं स्मरन्यः पठॆत ।
स्तॊत्रं दिव्यमिदं सदा न हि भवॆत तस्याऽसुखं किंचन ॥ ३१ ॥

किंत्विष्टार्थसमृद्धिरॆव कमलानाथ प्रसादॊदयात ।
कीर्तिर्दिग्विदिता विभूतिरतुला साक्षीहयास्यॊऽत्रहि ॥ ३२ ॥

इति श्री राघवॆंद्रार्य गुरुराज प्रसादतः ।
कृतं स्तॊत्रमिदं पुण्यं श्रीमद्भिर्यप्पणाभिदैः ॥ ३३ ॥

पूज्याय राघवॆंद्राय सत्यधर्म रताय च ।
भजतां कल्पवृक्षाय नमतां कामधॆनवॆ ॥ ३४ ॥

॥ इति श्री अप्पणाचायकृत श्री राघवॆंद्र स्तॊत्रं संपूर्ण ॥

www.yousigma.com